National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2017;** 1(11): 108-109
© 2017 NJHSR
www.sanskritarticle.com

**डा. विनोदानन्द झा**
सहायक-प्राचार्य: (ज्योतिष विभाग:)
सरस्वती विलास संस्कृत महाविद्यालय,
शोकहरा, बरौनी, बेगूसराय, बिहार

**Correspondence:**
**डा. विनोदानन्द झा**
सहायक-प्राचार्य: (ज्योतिष विभाग:)
सरस्वती विलास संस्कृत महाविद्यालय,
शोकहरा, बरौनी, बेगूसराय, बिहार

# भाग्येशवशेन भाग्योदयकालनिर्णय:

**डा. विनोदानन्द झा**

भाग्यं फलति सर्वत्र न विद्या न च पौरूषम् इति मीमांसायाम् भाग्योदयविमर्शो क्रियते। वस्तुत: ज्योतिषशास्त्रस्य जातकस्कन्धे एतस्य विमर्शो विद्यते।

यस्य जातकस्य जन्मकाले भाग्येश: जायाभावे तनुभावे वा भवेत्तदा जातक: गुणवान्, धनधान्यैश्वर्यान्वितो राजा भवति।यस्य लग्ने भाग्येशो भवेदसौ कुशाग्रबुद्धियुत: चपल: देवगुरुपूजकश्च जायते। यदा भाग्येश: पराक्रमभावे वित्तभवने वा स्यात्तदा योगेऽस्मिन् समुत्पन्नस्य जातकस्य शीघ्रं भाग्योदयो जायते। यस्य जन्मनि भाग्येश: सहजभावस्थ: स्यात्तदा जातक: स्वबन्धुजनप्रतिपालक:, प्रसिद्ध:, यशस्वी, प्रजापालकश्च जायते। यस्य जन्मकाले भाग्येश: राज्यसदने कर्मभवने वा भवेदसौ राजमंत्री, सेनापति:,साहसी, पराक्रमी च जायते। कथितं च विद्यते अस्मिन् प्रसंगे-

**"सबले भाग्यपे भाग्ये भाग्ययुक्तो भवेन्नर:।**
**भाग्यस्थानगते जीवे तदीशे केन्द्र संस्थिते ।।"**[१]

यदा भाग्येश: धने धर्मेशश्च भाग्यभवने भवेत्तदा महायोग: भवति। अनेन प्रकारेण परस्परभावाधिपति: परस्परभावे अवस्थितो जायते तदा महायोग: भवति। योगेऽस्मिन् समुत्पन्न: जातक: बहुधनधान्ययुतो राजा जायते। यस्य जन्मनि भाग्याधीश: पंचमलाभभवने वा भवेत्तदा जातोऽयं धीरोदात्तगुणैर्युत: भाग्यवान् भवति। भाग्येश: सप्तमभवने सति जातक: चतुरां कार्यकुशलां-परिपरायणां सुरुपां पतिव्रतां च स्त्रीं लभते। भाग्यस्थाने संप्राप्ते भाग्येशे नर: सर्वगुणसम्पन्न:, सौन्दर्यसमन्वित: धनधान्ययुत:, बहुभ्रातृसुखैर्युतो भाग्यवान् भवति।

अस्मिन् प्रसंगे एवं कथितं विद्यते-

**"सुकृतभावपतिर्नवमे स्थितो भवति बन्धुजनै: सहित: शुचि:।**
**अरुचितश्चविवादकरो जनो गुरुसुहृत् स्वजने पुरत: सदा॥"**[२]

यस्य जनुषि भाग्येश: भाग्यकारकग्रहश्च शुभग्रहाणां वर्गे, शुभग्रहेण युतो वा स्यात्तदा जातक: भाग्यवान् भवति। यस्य जनुषि भाग्येश: धनस्थ:, धनेश: आयभवनस्थ:, लाभेशश्च भाग्यस्थो भवेत्तथा भाग्येशकर्मेशौ योगकारकौ स्यातां तदा योगोऽयं भाग्यबृद्धिकारको जायते। योगेऽस्मिन जातस्य जनस्य भाग्योदयो शीघ्रं जायते। यदा लग्नेशभाग्येशौ, धनेशलाभेशौ, भाग्येशलाभेशौ, कर्मेशभाग्येशलग्नेशाश्च सम्बन्धसमन्विता: भवेयु: तदा भाग्योदयं कुरुते।

यदा भाग्येशो लाभस्थानगतो स्यात्तदा जातक: राजवन्द्य: धर्मशीलश्च जायते। तदनु यस्य जनुषि द्वितेयेश- लग्नेश - चतुर्थेशा: स्ववेश्मस्था: अर्थात् द्वितीयचतुर्थलग्नभावगता: भाग्येशश्च लग्नस्थो भवेत्तदा द्विपराजसिंहासनानां प्राप्तिर्भवति। यतो हि-

**भाग्येशो मूर्तिवर्ती सुरपतिगुरुणालोकितो भूपवन्द्यो -**
**लग्नस्थो वाहनेशो नवमपतिरूभौ पश्यतश्चेत् स्वगेहम् ।**
**सर्वासामास्पदं स्यान्मनुज इह तदा सम्पदां वाहनेन्द्रो-**
**...................................................॥**[३]

भाग्यनाथेन सहित: राज्येश: स्वगेहे शुभग्रहयुत: स्यात्तदा जात: माण्डलिक: स्यात्। लग्नगते चतुर्थेशे गुरूणा अवलोकिते नृपवन्द्यो जायते जन:। यदा भाग्येशो सहजस्थ: बलिना शुभग्रहेणावलोकित:

समन्वितो वा स्यात्तदा सौम्याकृतिसमन्वित:, पावनाचरणशील: स्वबंधुजनप्रतिपालक:, प्रसिद्धकर्मकरश्च भवति। राज्यस्थाने संप्राप्ते भाग्येशे सति बुधसुहृत् पितृपूजनतत्पर:, तीर्थाटने संलग्न:, देशभक्तश्च भवति। विद्यास्थाने गतवति भाग्येशे सुभग:, सौम्य:, मृदुभाषी, विविधगुणसमन्वितपुत्रै: युक्तो भवति। यतो हि-

**सुकृतपे तनयस्थलगे यदा सुरमहीसुरभावयुतो नर:।**
**प्रकृतिसुन्दरतामतिमान्नरो मधुरवाक्तनयाश्चभवन्ति॥**[४]

यदा भाग्यस्थानं शुभग्रहेण स्वाधिपतिना अवलोकितो भवेत्तदा जनानां भाग्योदयो जायते। भाग्यराशिपति: स्थितो यस्मिन् राशौ तद्राशिपति: भाग्यस्य कर्त्ता भवति। भाग्येशाधिपते: शुभाशुभ-स्थितिवशेनापि शुभाशुभभाग्यविचार: कर्त्तव्य:। भाग्येशो ग्रहो हि भाग्यपरिचायको भवति अर्थात् भाग्येशदशायां भाग्योदय: सम्भव: भवति। ततो पंचमेश्वरो अर्थान्नवमभावात्पंचमेश्वरोऽर्थाल्लग्नेश: भाग्यज्ञापको जायते। ते सर्वे भाग्येश-भाग्येशाधिष्ठित-राशीश-भाग्यगत- लग्नेशा: यदि तुङ्.ग स्वर्क्षगता स्युस्तदा जीवनपर्यन्तं सौभाग्यसमन्वितो भवति। यतो हि-

**सौम्यस्वामियुतेक्षितं नवमभं भाग्यप्रदं प्राणिनां-**
**तद्राशीशसमेतराशिरमणो भाग्यस्य कर्त्ता भवेत्।**
**"भाग्येश: परिचायको भवति तत्पुत्रेश्वरो बोधकस्तु-**
**ङ्.गस्वर्क्षगृहोपगो यदि चिरं भाग्यं प्रकुर्वन्ति ते ॥"**[५]

येषां भाविनां जन्मकाले बलीभाग्येश: दशमस्थाने दशमेशश्च धनभावस्थो भवेत् सबलो कर्मेशश्च भाग्यभवने स्यात्तदा विजयावगमने गर्ज्जद्दन्ताबलनिकरघण्टाघनरवैर्वित्रस्ता अरिगण: दिगन्तं यान्ति अर्थात् दिग्विजयी भवति।
यतो हि-

**"बलीपुण्यस्वामी दशमभवनाधीशभवने तप:**
**स्वाम्यागारे भवति दशमेशोऽपिभविनाम्।**
**तदागर्ज्जद्दन्ता बलनिकरघण्टाघनरवै-**
**र्दिगन्तं वित्रस्तो विजयगमने यात्यरिगण:॥"**[६]

यस्य जननकाले स्वोच्चस्वषडवर्गे मित्रादिगृहस्थे भाग्येशे कर्मस्थे पूर्णबलान्विते कर्मेशे दशमभवने च स्यात्तदा अस्मिन् योगे समुत्पन्नो जातक: चक्रवर्ती राजा भवति। यदा जन्मकाले चन्द्रात्पुण्यराशिपति: देवलोकांशगत: चन्द्रश्च पूर्णबलान्वितो भवेत्तदा योगेऽत्र जात: नर: गोगजव्रजतुरङ्गमण्डलीमण्डितो-मणिगणैरिलापति: अर्थात् सम्प्रभुता सम्पन्न: राजा भवति। यतो हि-

**" देवलोकलवगोनिशाकरात्पुण्यराशिपतिरिन्दुकान्तिभाक् ।**
**गोगजव्रजतुरङ्गमण्डलीमण्डितो मणिगणैरिलापति:॥"**[७]

यदा वाहनेशो शनिबृहस्पतिशुक्रै: सह भाग्यभवनाधिष्ठित: भाग्येशश्च राज्यभवनस्थ: केन्द्रत्रिकोणयोरन्यतरस्थ: स्यात्तदा विविधयानै: समन्वितो भवति जातक:। यदा सबल: भाग्येश: सप्तमभवने अवस्थित: भवेत्तदा गुणवान्, कार्यकुशल: च जातक: भवति। अस्मिन् प्रसंगे कथितं विद्यते-

**"भाग्यवान् सप्तमे कल्प्ये गुणवान् पशुमान् भवेत् ।**
**कदाचित्तु भवेत्सिद्धिर्यत्कार्यकर्त्तुमिच्छति॥"**[८]

यस्य जातकस्य जन्मकाले भाग्येश: शुभग्रहै: समन्वितो भवेत् तदा शुभानि फलानि विजानीयात्। यस्य भाग्येशलग्नाधीशौ सहजस्थौ भाग्यभवनगतौ स्वोच्चस्थौ सबलौ च तिष्ठेतां तदा योगेऽस्मिन् समुत्पन्नो जातक: सुकीर्त्तियुत:, विद्याविनयान्वित: ग्रामोन्नति-कारक: श्रेष्ठपुरुषत्वेन विख्यातो जायते। यथा-

**भाग्याधिपे विलग्नेशे दुश्चिक्ये धर्मगेऽपि वा।**
**बलवान् स्वोच्चमेवापि येषां ते श्रेष्ठमानवा:॥"**[९]

यस्य जातकस्य जन्मकाले भाग्येश: द्वितीयस्थाने, आयेश: भाग्यभवने, धनेशश्च लाभभवने अवस्थितो भूत्वा कर्माधिपेन सबलेन युतेऽक्षितो वा भवेत् तदा जातक: विविधगुणसम्पन्न:, कीर्त्तियुक्त:, नीरक्षीरविवेकी, परोपकारी, पराक्रमी च भवति अर्थात् जातकोऽयं अतिभाग्यशाली भवति। यथोक्तं च विद्यते-

**"धनाधिपे लाभगते तदीशे भाग्यस्थिते तद्भवनाधिपेऽर्थे।**
**कर्माधिपेनापि युतेऽथ दृष्टे जातो महाभाग्ययुतो नर: स्यात्॥"**[१०]

यस्य जातकस्य जन्मकुण्डल्यां भाग्येश: सबलो भूत्वा केन्द्रस्थ: त्रिकोणस्थो वा भवेत् तथा शुभग्रहैरवलोकितो स्वकीय वैशेषिकांशे च स्यात्तदा जातक: धीरबुद्धियुक्त:, प्रतापी, कर्मठ:, यशस्वी च जायते। कर्मठत्वात् भाग्योदयं लभते नर: । अस्मिन् प्रसंगे एवं कथितं विद्यते-

**"मातृपे बलिनि केन्द्रकोणगे सौम्यदृष्टे वैशेषिकांशे धीर:॥"**[११]

यदा पंचमेश: भाग्यभवने, भाग्येशश्च पंचमभावे भवेत्तदा योगेऽस्मिन् समुत्पन्न: जातक: यदि राजपुत्र: स्यात्तदा राजा, अन्यजो वा राजमन्त्री बोध्य:। यदा भाग्येश: गुरूशुक्राभ्यां युक्तोऽवलोकितो वा भवेत्तदा जातक: भाग्योदयं लभते। भाग्येशायेशयो परस्परं सम्बन्धयुक्ते सति भाग्योदयं लभते। भाग्येश: अर्थसदने सबलग्रहै: युते दृष्टे वा सति भाग्योदयं लभते नर:। यदा भाग्येश: द्वितीयस्थ: कर्मेशेन समन्वितोऽवलोकितो वा तदा जातक: भाग्येशदशायां भाग्योदयं लभते। उक्तं च अस्मिन् प्रसंगे-

**"धर्मपेऽर्थे कर्मपयुतदृष्टे भाग्यवान्"**[१२]

अनेनैव प्रकारेण भाग्येशवशेन भाग्योदयकालनिर्णयो क्रियते ज्योतिर्विद्भि:।

**सन्दर्भ ग्रन्थः**


१ अभिनवज्योतिषसारे- पृ.सं.-२५०, श्लोके- १०७
२ यवनजातके १/१२
३ जातकालंकारे श्लोके -२९
४ बृहद्यवनजातके पृ. १३२ श्लोके-५
५ जातकपरिजाते नवमफलाध्याये श्लोके- ६७
६ भावकुतूहले- अ.७ श्लोके-१८
७ भावकुतूहले अ.७ श्लोके२४
८ जातकाभरणे परिशिष्टे श्लोके-५
९ सर्वाथचिन्तामणौ नवमभावफलविचाराध्याये श्लोके-८९
१० सर्वाथचिन्तामणौ नवमभावफलविचाराध्याये श्लोके-९१
११ जातकतत्वे प्रथमविवेके सूत्रे १८३
१२ जातकतत्वे नवमविवेके सूत्रे ७०